प्रतिमण्डलादुत्तरतो विमण्डलं केनचिदाधारेण स्थिरं कृत्वा मेषादेरनुलोमं मन्दस्फुटं ग्रहं प्रतिमण्डले विमण्डले च दत्त्वा विक्षेपोपपत्तिं दर्शयेत्। तत्र तयोर्यं द्वयोर्यावान् विप्रकर्षस्तावांस्तत्र प्रदेशे विक्षेपः। अथ तत्स्थानयनम्। पातस्थाने हि विक्षेपाभावः। ततस्त्रिभेऽन्तरे परमो विक्षेपः। अन्तरेऽनुपातेन। अतः पातग्रहचिह्नयोरन्तरं तावज्ज्ञेयम्। तच्च तयोर्योगे कृते भवति। यतो मेषादेरनुलोमं ग्रहो दत्तः। पातस्तु प्रतिलोमम्"। गणितागतपातकाले कृत्याकृत्ये "पातस्थितिकालान्तर्मङ्गलकृत्यं न शस्यते तज्ज्ञैः। स्नानजपहोमदानादिकमल्पोपैति खलु द्रविम्" सि॰ शि॰ उक्ते। पत—घञ् भावे। ५पतने। दृष्टिपातः स्रवपात इत्यादि। पत—ज्वला॰ कर्त्तरि ण। ६पतनकर्त्तरि त्रि॰। पा—रक्षणे कर्म्मणि घञ्। ७त्राते त्रि॰ मेदि॰।

**पातक** त्रि॰ पातयति पाति—ण्वुल्। १पतनकारके नरकरूपापकृष्टस्थानप्रापके नवविधे पापभेदे २अनुपातके च यथोक्तं प्रा॰ वि॰ "पातकपदमनुपातकपर्य्यायः, ननु नवस्वेव पापेषु पातकशब्दो दृश्यते यथा पैठीनसिः, "स्त्रीगोहस्त्यश्ववैश्यक्षत्रियघाती सोमविक्रयी शूद्रेण सहभोजी कन्यादूषी अगारदाही दूषणीपतिरग्न्युत्सादी चेति पातकिनः"। नवविधं पापमभिधायाह विष्णुः "एवं पातकिनः पापमनुभूय सुदुःखिताः। तिर्य्यग्योनौ प्रवर्त्तन्ते दुःखानि विविधानि च"। याज्ञवल्क्यः "नीचाभिगमनं गर्भपातनं भर्तृहिंसनम्। विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवम्"। पतनीयानि पातकानीत्यर्थः। "कृत्यल्युटो बहुलमिति" करणेऽनीयर्। "महापातकतुल्यानि पापान्युक्तानि यानि च। तानि पातकसंज्ञानि तदूनमुपपातकम्"। अतो महापातकतुल्यपापविशेषेऽप्यस्य शक्तिः। "नवविधपातकञ्च विष्णुसं॰ "तेनायमाक्रान्तोऽतिपातकमहापातकानुपातकोपपातकेषु प्रवर्त्तते। जातिभ्रंशकरणेषु सङ्करीकरणेष्वपात्रीकरणेषु च। मलावहेषु प्रकीर्णकेषु च" उक्तम्। ततः अस्त्यर्थे इनि। पातकिन् तद्युक्ते त्रि॰ स्त्रियां ङीप्।

**पातङ्गि** पु॰ पतङ्गस्य सूर्य्यस्यापत्यम् इञ्। १शनैश्चरे २यमे च ३कर्णे ४वैवस्वतमनौ ५सुग्रीवे च।

**पातञ्जल** न॰ पतञ्जलिना प्रोक्तम् अण्। १पाणिनिसूत्रवार्त्तिकव्याख्यानरूपे "अथ शब्दानुशासनम्" इत्यादिके महाभाष्ये, "पातञ्जले महाभाष्ये कृतभूरिपरिश्रमः" शेखरः। "अथ योगानुशासनम्" इत्यादिके २योगशास्त्रे च। पतञ्जलिशब्दे दृश्यम्।

**पातञ्जलिन्** पु॰ पतञ्जली तच्छब्दोऽस्त्यस्याध्याये अनुवाके वा विमुक्ता॰ अण्। पतञ्जलिशब्दयुक्ते १अध्याये २अनुवाके च।

**पातन** त्रि॰ पातयति पाति—ल्यु। १पतनकारके स्त्रियां गौरा॰ ङीप्। भावे ल्युट्। २अधोनयने न॰।

**पातत्र** त्रि॰ पत—बा॰ अत्रन्। पतनशीले ऋ॰२।५३।१७भा॰

**पाताल** न॰ पतत्यस्मिन्नधर्मेण पत—आलञ्। १भुवनस्याधोभागे २सर्वाधोभागस्थे स्थानभेदे। तानि च सप्तैव यथा "पातालानि च सप्तैव मुनयः संप्रचक्षते। अतलं वितलञ्चैव सुतलञ्च तलातलम्। महातलञ्च विख्यातं ततो ज्ञेयं रसातलम्"। "ततः पातालमित्येवं सप्त पातालसंज्ञकाः। एते स्वर्गाधिकसुखा ! बिलस्वर्गाः प्रकीर्त्तिताः। सततं भवनोद्यानविहारक्रीड़नत्पराः" पाद्मे पातालखण्डे। "अतलं सुतलञ्चैव वितलञ्च गभस्तिमत्। महातलं रसातलं पातालं सप्तमं स्मृतम्। कृष्णभौमं शिलाभौमं पातालं नीलमृत्तिकम्। रक्तपीतश्वेतकृष्णभौमानि च भवन्त्यपि। पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम्। शुषिरं तानि कथ्यन्ते भुवनानि चतुर्दश। अष्टाविंशतिसंख्याता स्ततो नरककोटयः। नरकाणामधस्तात्तु धूमः कालाग्निसम्भवः। तस्याधस्तादनन्ताख्यो रुद्रः सर्वमयो महान्। तदधो धर्म्मचक्रन्तु येनेदं धार्य्यते जगत्" वह्निपु॰। ३औषधपाकार्थयन्त्रभेदे "ऊर्द्ध्वमापस्तले वह्निर्मध्ये च रससंग्रहः। पातालचक्रमेतद्धि शोधयेत् पारदादिकम्"। ४वड़वानले ५गर्त्तमात्रे च मेदि॰।

**पातालकेतु** पु॰ दानवभेदे मार्कं॰पु॰ २१अ॰।

**पातालगरुड़ी** स्त्री छिलिहिण्डाख्ये लताभेदे राजनि॰। भावप्र॰ अस्य पुंस्त्वमुक्तं यथा "छिलिहिण्डो महाबलः पातालगरुड़ाह्वयः। छिलिहिण्डः परं वृष्यः कफघ्नः पवनापहः"।

**पातालनिवास** पु॰ नि+वस—आधारे घञ् पातालं निवासो यस्य। दैत्ये पातालनिलयादयोऽप्यत्र हला॰ पातालौकस तत्रार्थे हेमच॰। [स्त्रियां च उज्ज्वलद॰।

**पाति** पु॰ पाति पा-रक्षणे डति। १प्रभौ पत—इण्। २प॰

**पातिक** पुंस्त्री॰ पातः पतनं जलमज्जनं प्रयोजनमस्य पाते साधु वा ठक्। शिशुमारे जलजन्तुभेदे शब्दमाला स्त्रियां जातित्वात् ङीप्।